ॐ

# अथ भ्रष्टाष्टकम् / मूर्खाष्टकं वा

विश्वं सत्यं मनुते तनुते च कर्माणि लोकसंसिद्ध्यै।
वाचा मिथ्या जगदिति जल्पति नो वेत्ति सो महाभ्रष्टः।। 1।।

ब्रह्मैवेदमिति जल्पति दोषादोषोत्तमाधमान्पश्यन्।
नग्नो भूत्वा विचरत्यवधूतत्वं प्रदर्शयन् सो भ्रष्टः।। 2।।

कृत्याकृत्यमशेषं त्यक्तुमशक्तं श्रुतेरगोचरताम्।
आत्मनि जल्पन् हास्यास्पदतामेत्येष मानवो सो भ्रष्टः।। 3।।

पाशाष्टक.संकष्टक्लिष्टतनुर्मृष्टभोजनादि - प्रीतः।
शिष्टोऽहं मन्वानो तिकृष्टमहो दुष्टमानवः सो भ्रष्टः।। 4।।

आत्मैवेदं सर्वं जल्पन् लोकोक्तिरसहमानो मेधावी।
स्तुतिवाक्यानि श्रोतुं सदा धावंस्तुष्टो न किं भवेद् भ्रष्टः।। 5।।

यस्मिन् स्वस्य च निष्ठा तद्धर्मिष्ठानशिष्टगणनायां।
कुर्वन्कर्म हतोऽयं यद्यपि शिष्टो न किं भवेद् भ्रष्टः।। 6।।

कर्तृत्वं भेक्तृत्वं च मन्वानः स्वस्मिन्नात्मनि प्रभौ शम्भौ।
रोदिति हा किं कृतमिति किं वा भोक्तव्यमिति सो भ्रष्टः।। 7।।

चिन्मात्रं स्वात्मानं देहं परं मन्वान एजते यभतः।
सर्वात्मानमबुद्ध्वा ब्रह्मापि स्यादहो किल सोऽपि भ्रष्टः।। 8।।

भ्रष्टाष्टकमेतद्यत्प्रविचारयतीह मानवो धन्यः।
मान्यः स्याल्लोकेषु यो सो भ्रष्टत्वं वेत्ति निजचारित्र्यस्य।। 9।।

।। इत्यों कम्।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM